॥ वाल्मीकि रामायण॥

३ अरण्यकाण्ड

अध्याय ५

शरभङ्गे दिवं प्राप्ते मुनिसङ्घाः समागताः ।
अभ्यगच्छन्त काकुत्स्थं रामं ज्वलिततेजसं ॥ १॥

वैखानसा वालखिल्याः सम्प्रक्षाला मरीचिपाः ।
अश्मकुट्टाश्च बहवः पत्राहाराश्च तापसाः ॥ २॥

दन्तोलूखलिनश्चैव तथैवोन्मज्जकाः परे ।
मुनयः सलिलाहारा वायुभक्षास्तथापरे ॥ ३॥

आकाशनिलयाश्चैव तथा स्थण्डिलशायिनः ।
तथोर्ध्ववासिनो दान्तास्तथार्द्रपटवाससः ॥ ४॥

सजपाश्च तपोनित्यास्तथा पञ्चतपोऽन्विताः ।
सर्वे ब्राह्म्या श्रिया जुष्टा दृढयोगसमाहिताः ।
शरभङ्गाश्रमे राममभिजग्मुश्च तापसाः ॥ ५॥

अभिगम्य च धर्मज्ञा रामं धर्मभृतां वरम् ।
ऊचुः परमधर्मज्ञमृषिसङ्घाः समाहिताः ॥ ६॥

त्वमिक्ष्वाकुकुलस्यास्य पृथिव्याश्च महारथः ।
प्रधानश्चासि नाथश्च देवानां मघवानिव ॥ ७॥

विश्रुतस्त्रिषु लोकेषु यशसा विक्रमेण च ।
पितृव्रतत्वं सत्यं च त्वयि धर्मश्च पुष्कलः ॥ ८॥

त्वामासाद्य महात्मानं धर्मज्ञं धर्मवत्सलम् ।
अर्थित्वान्नाथ वक्ष्यामस्तच्च नः क्षन्तुमर्हसि ॥ ९॥

अधार्मस्तु महांस्तात भवेत्तस्य महीपतेः ।
यो हरेद्बलिषड्भागं न च रक्षति पुत्रवत् ॥ १०॥

युञ्जानः स्वानिव प्राणान्प्राणैरिष्टान्सुतानिव ।
नित्ययुक्तः सदा रक्षन्सर्वान्विषयवासिनः ॥ ११॥

प्राप्नोति शाश्वतीं राम कीर्तिं स बहुवार्षिकीम् ।
ब्रह्मणः स्थानमासाद्य तत्र चापि महीयते ॥ १२॥

यत्करोति परं धर्मं मुनिर्मूलफलाशनः ।
तत्र राज्ञश्चतुर्भागः प्रजा धर्मेण रक्षतः ॥ १३॥

सोऽयं ब्राह्मणभूयिष्ठो वानप्रस्थगणो महान् ।
त्वन्नाथोऽनाथवद्राम राक्षसैर्वध्यते भृशम् ॥ १४॥

एहि पश्य शरीराणि मुनीनां भावितात्मनाम् ।
हतानां राक्षसैर्घोरैर्बहूनां बहुधा वने ॥ १५॥

पम्पानदीनिवासानामनुमन्दाकिनीम् अपि ।
चित्रकूटालयानां च क्रियते कदनं महत् ॥ १६॥

एवं वयं न मृष्यामो विप्रकारं तपस्विनम् ।
क्रियमाणं वने घोरं रक्षोभिर्भीमकर्मभिः ॥ १७॥

ततस्त्वां शरणार्थं च शरण्यं समुपस्थिताः ।
परिपालय नो राम वध्यमानान्निशाचरैः ॥ १८॥

एतच्छ्रुत्वा तु काकुत्स्थस्तापसानां तपस्विनाम् ।
इदं प्रोवाच धर्मात्मा सर्वानेव तपस्विनः ।
नैवमर्हथ मां वक्तुमाज्ञाप्योऽहं तपस्विनम् ॥ १९॥

भवतामर्थसिद्ध्यर्थमागतोऽहं यदृच्छया ।
तस्य मेऽयं वने वासो भविष्यति महाफलः ।
तपस्विनां रणे शत्रून्हन्तुमिच्छामि राक्षसान् ॥ २०॥

दत्त्वा वरं चापि तपोधनानां
धर्मे धृतात्मा सहलक्ष्मणेन ।
तपोधनैश्चापि सहार्य वृत्तः
सुतीष्क्णमेवाभिजगाम वीरः ॥ २१॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com